लोकप्रियसाहित्यमाला - 2

# मूको रामगिरिर्भूत्वा

## आधुनिकसंस्कृतोपन्यासः

डॉ. हर्षदेवमाधवः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

देवत्वहीनः पाषाणखण्डः

संस्कृतसाहित्ये नैका नवीना विधा अनेन स्थापिताः। तेषु एकबिम्बकाव्यानि विशिष्य चमत्कुर्वन्ति। एकबिम्बकाव्यशैली पदार्थाभिनयविस्तारं पुरस्कुर्वतः केरलदेशीयकूडियाट्टनाट्यस्येव एकस्य पदार्थस्य अनन्तरूपाणां विभावनां विधत्ते। माधवस्य एकबिम्बकाव्यानि आनन्दवर्धनस्य इमामुक्तिं चरितार्थयन्ति–

अनेनानन्त्यमायाति कवीनां प्रतिभागुणः।

X X X

न काव्यार्थविरामोऽस्ति यदि स्यात् प्रतिभागुणः।।

X X X

अवस्थादेशकालादिविशेषैरपि जायते।
आनन्त्यमेव वाच्यस्य शुद्धस्यापि स्वभावतः।।

X X X

वाचस्पतिसहस्राणां सहस्रैरपि यत्नतः।
निबद्धा सा क्षयं नैति प्रकृतिर्जगतामिव।

हर्षदेवमाधवस्य काव्ययात्रा प्रायो नूतनप्रस्थानेषु परिवर्तनं करोति। उपनिषदां दर्शनमनेन समकालिककाव्यसंसारे अवतारितम्। संवादोपनिषत्, प्रकाशोपनिषत् तथा च मन्त्रोपनिषद् इति काव्येषु तेन प्रणीतेषु ऋषीणां प्रज्ञा अद्यतनभाषया अभिव्यक्तिमुपागता, चरितार्थीभूतं च नानृषिः कविरित्युक्त ऋषिश्च किल दर्शनादिति भट्टतौतस्य वचनम्। कविः स्वयमेव प्रकाशविमर्शमयः सञ्जातः–

ते तपस्यन्ति
प्रकाशमन्वेष्टुम्
अहमाह्वयाम्यभिसाराय
प्रकाशम्
ते रचयन्ति प्रकाशस्य भाष्याणि
अहं स्पृशामि तम्
यथा त्वाम्

विना, पिण्डैर्विना अस्माकं दयनीया-शोचनीया दशा जाता । अत एव विषादो नो घनीभूतः । श्राद्धक्रियया सन्तुष्टा वयम् । एवमेव त्वया स्मर्तव्या वयम् ।'

'अहं नावगच्छामि किञ्चित् । अहं किं करवाणि ?'

'पुत्रक ! पश्य सर्वां कालस्य लीलाम् । त्वमपि तव पृथ्व्यागमनप्रयोजनं ज्ञास्यसि । स्वस्ति तुभ्यम् ।' इत्युक्त्वा ते स्वर्गताः ।

**वैशाखशुक्लप्रतिपदा**

अद्यापि पार्थिवी न प्रतिनिवृत्ता । अहं प्रतिक्षणं तां प्रतिपालयामि । अहं जाने यत् तया सह मम नास्ति कोऽपि सम्बन्धः । तदापि तां स्मरत्येव मे मनः, यथा त्वां प्रतिक्षणं स्मरति । किमिदं सुखं वा दुःखं वेति न ज्ञातुं पारयामि । केवलमहं कालस्य क्रीडनकं भूत्वा जीवामीति मन्ये । अपि पार्थवी कुशलिनी भवेत् ? किं मार्गश्रमेण सा अस्वस्था भवेत् ? अथवा विघ्नैः पीडिता भवेत् ? अतिस्नेहः पापशङ्कीति दृढमवैमि । नूनमयमेवास्ति स्नेहो येन ग्रथितोऽस्ति मायामयोऽयं संसारः ।

कण्टकयुक्ते गुल्मे मया दृष्टा कापि नवीना लता, तस्यां जम्बूवर्णपुष्पाणि अतीव रम्याणि नेत्राञ्जनसमानि सन्ति । किं नाम भवेत् तस्याः ?

अपरिचिता सा मह्यं यथाहं पृथ्व्यै ।

**वैशाखशुक्लद्वितीया**

अद्यः प्रातःकाले पार्थिवी पुनरपि चक्षुर्गोचरीभूता । सा प्रवासश्रान्ता दृश्यते स्म, किन्तु प्रसन्ना । सा आगत्य मामाश्लिष्टवती । तया हरितवर्णानि वस्त्राणि धृतानि । तस्या हस्ते भूर्जपत्रमयमेकं पुस्तकं वर्तते स्म । पुस्तकं जीर्णशीर्णमासीत् । 'आकाशगामिनीविद्याकल्पम्' इति ग्रन्थं सा मह्यं दत्तवती ।

'अस्मिन् कल्पे २३२ द्रव्याणामावश्यकता वर्तते । अधुना आवाभ्यां तानि वस्तूनि-औषधानि मार्गयितव्यानि । सत्वरमेव कल्पसिद्धिर्भविष्यति' तया एकश्वासेनैव सर्वमपि ससाध्वसमुक्तम् ।'